श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# कृष्णयजुर्वेदे एकाग्निकाण्डे
# ॥ प्रथमः प्रश्नः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रथमः प्रश्नः ॥

॥ ह॒रिः॒ ओ(४)म्॒ ॥

प्र॒सु॒ग्मन्ता॑ धि॒यसा॒नस्य॑ स॒क्षणि॑
  व॒रेभि॑र्व॒राग्ं अ॒भिषु॒प्रसी॑दत।
अ॒स्माक॒मिन्द्र॑ उ॒भय॑ जु॒जोषति॒
  यथ्सौ॒म्यस्यान्ध॑सो॒ बुबो॑धति।
अ॒नृ॒क्ष॒रा ऋ॒जव॑स्सन्तु॒ पन्था॒ येभि॒स्सखा॑यो॒
  यन्ति॑ नो वरे॒यम्।
सम॑र्य॒मा सं भगो॑ नो निनीया॒थ्सं जा᳚स्प॒त्यग्ं
  सु॒यम॑मस्तु॒ देवाः।
अभ्रा॑तृघ्नी॒ वरु॒णाप॑तिघ्नीं बृहस्पते।
इन्द्रापु॑त्रघ्नीं ल॒क्ष्म्य॑ ताम॒स्यै स॑वितस्सुव।
अघो॑रचक्षु॒रप॑तिघ्न्येधि शि॒वा
  प॒तिभ्य॑स्सु॒मना᳚स्सु॒वर्चाः᳚।
जी॒व॒सूर्दे॒वका॑मा स्यो॒ना शं नो॑
  भव द्वि॒पदे॒ शं चतु॑ष्पदे।
इ॒दम॒हं या त्वयि॑ पति॒घ्न्य॑ल॒क्ष्मिस्तां॑ निर्दि॑शामि।
जी॒वाग्ं रु॑दन्ति॒ विम॑यन्ते अध्व॒रे

Please let us know of any errors in this text.

दी॒र्घामनु॒ प्रसि॑तिं दीधियु॒र्नर॑ः।
वा॒मं पि॒तृभ्यो॒ य इ॒दग्ं स॑मेरि॒ रे मय॒ः
पति॑भ्यो॒ जन॑यः परि॒ष्वजे᳚।
व्यु॑क्षत्क्रू॒रमुद॑च॒न्त्वाप॒ आऽस्यै
ब्रा᳚ह्म॒णास्स्नप॑नग्ं हरन्तु।
अवी॑रघ्नी॒रुद॑च॒न्त्वाप॑ः।
अ॒र्य॒म्णो अ॒ग्निं परि॑ यन्तु क्षि॒प्रं
प्रती᳚क्षन्ता॒ग् श्वश्र्वो॑ दे॒वरा᳚श्च।
खेऽन॑स॒ः खे रथ॒ः खे युग॑स्य शचीपते।
अ॒पा॒लामि॑न्द्र॒ त्रिः पू॒त्व्य॑कर॒थ्सूर्य॑वर्चसम्।
शं ते॒ हिर॑ण्य॒ग्ं॒शमु॑ स॒न्त्वाप॒श्शं ते॑ मे॒धी
भ॑वतु॒ शं यु॒गस्य॒ तृद्म॑।
शं त॒ आप॑श्श॒तप॑वित्रा भव॒न्त्वथा॒
पत्या॑ त॒न्व॑ग्ं॒ सग्ं सृ॑जस्व॥ **1**॥

दी॒धि॒यु॒र्नरो॒ऽष्टौ च॑॥ **1**॥

हिर॑ण्यवर्णा॒श्शुच॑यः पाव॒काः
प्रच॑क्रमुर्हि॒त्वाऽव॒द्यमाप॑ः।
श॒तं प॒वित्रा॒ वित॑ता॒ ह्या॑सु॒ ताभि॑ष्ट्वा
दे॒वस्स॑वि॒ता पु॑नातु।
हिर॑ण्यवर्णा॒श्शुच॑यः पाव॒का यासु॑

जा॒तः क॒श्यपो॒ यास्व॒ग्निः।
या अ॒ग्निं गर्भं दधि॒रे सु॒वर्णा॒स्तास्त॒
आप॒श्शग्ग्॒ स्यो॒ना भंवन्तु।
यासा॒ग्॒ं राजा॒ वरुंणो॒ याति॒ मध्ये
सत्यानृते अंव॒पश्य॒ञ्जनांनाम्।
या अ॒ग्निं गर्भं दधि॒रे सु॒वर्णा॒स्तास्त॒
आप॒श्शग्ग्॒ स्यो॒ना भंवन्तु।
यासां॒ दे॒वा दि॒वि कृ॒ण्वन्तिं भ॒क्षं या
अ॒न्तरिंक्षे बहु॒धा निविंष्टाः।
या अ॒ग्निं गर्भं दधि॒रे सु॒वर्णा॒स्तास्त॒
आप॒श्शग्ग्॒ स्यो॒ना भंवन्तु।
शि॒वेनं त्वा॒ चक्षुंषा पश्यन्त्वापश्शि॒वयां
त॒न्वोपंस्पृशन्तु॒ त्वचं ते।
घृ॒त॒श्चुत॒श्शुचंयो॒ याः पांव॒कास्तास्त॒
आप॒श्शग्ग्॒ स्यो॒ना भंवन्तु।
परिं त्वा गिर्वणो॒ गिरं इ॒मा भंवन्तु वि॒श्वतंः।
वृ॒द्धायु॒मनु॒ वृद्धंयो॒ जुष्टां भवन्तु॒ जुष्टंयः।
आ॒शासा॒नेत्ये॒षा।
पू॒षा त्वे॒तो नंयतु॒ हस्त॒गृह्या॒श्विनौं
त्वा॒ प्रवंहता॒ग्॒ं रथेंन।

गृहान्गंच्छ गृहपंत्नी यथाऽसों
वशिनी त्वं विदथमावंदासि॥ **2**॥

भवन्तु पञ्चं च॥ **2**॥

सोमंः प्रथमो विंविदे गन्धर्वो विंविद उत्तंरः।
तृतीयों अग्निष्टे पतिंस्तुरीयंस्ते मनुष्यजाः।
सोमोंऽददद्गन्धर्वायं गन्धर्वोऽदंददग्नयें।
रयिं चं पुत्राग्श्चांदादग्निर्मह्यमथों इमाम्।
गृभ्णामिं ते सुप्रजास्त्वाय हस्तं मया
पत्यां जरदंष्टिर्यथाऽसंः।
भगों अर्यमा संविता पुरंन्धिर्मह्यं
त्वाऽदुर्गार्हंपत्याय देवाः।
ते ह पूर्वे जनांसो यत्रं पूर्ववहों हिताः।
मूर्धन्वान् यत्रं सौभ्रवः पूर्वो देवेभ्य आतंपत्।
सरंस्वति प्रेदमंव सुभंगे वाजिंनीवति।
तां त्वा विश्वंस्य भूतस्यं प्रगायांमस्यग्रतः।
य एतिं प्रदिशस्सर्वा दिशोऽनु पवंमानः।
हिरंण्यहस्त ऐरं मस्स त्वा मन्मंनसं कृणोतु।
एकंमिषे विष्णुस्त्वाऽन्वेंतु द्वे ऊर्जे त्रीणिं
व्रतायं चत्वारि मायोंभवाय पञ्चं
पशुभ्यष्षड्ढतुभ्यंस्सप्त सप्तभ्यो

होत्रा॑भ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु।
सखा॑ स॒प्तप॑दा भव॒ सखा॑यौ स॒प्तप॑दा
बभूव स॒ख्यं ते॑ गमेयग्ं स॒ख्यात्ते मा यो॑षग्ं
स॒ख्यान्मे॒ मा यो॑ष्ठा॒स्सम॑याव॒ सङ्क॑ल्पावहै॒
संप्रि॑यौ रोचि॒ष्णू सु॑मन॒स्यमा॑नौ।
इ॒षमूर्ज॑म॒भि सं॒वसा॑नौ॒ सं नौ॒ मनाग्ं॑सि॒
सं व्र॒ता सम॑ु चि॒त्तान्याक॑रम्।
सा त्वम॒स्यमू॒हम॑मू॒हम॑स्मि॒ सा त्वं द्यौर॒हं
पृ॑थि॒वी त्वग्ं रेतो॒ऽहग्ं रे॑तो॒भृत्त्वं
मनो॒ऽहम॑स्मि॒ वाक्त्वग्ं सामा॒हम॒स्म्यृ॑क्त्व॒ग्॒ं
सा मामनु॑व्रता भव पु॒ग्ं॒से पु॒त्राय॒ वेत्त॑वै श्रि॒यै
पु॒त्राय॒ वेत्त॑व॒ एहि॑ सूनृते॥ 3॥

अ॒ग्र॒तष्षट्च॑॥ 3॥

सोमा॑य जनि॒विदे॒ स्वाहा॑ गन्ध॒र्वाय॑ जनि॒विदे॒
स्वाहा॒ऽग्नये॑ जनि॒विदे॒ स्वाहा॑।
क॒न्य॒ला पि॒तृभ्यो॑ य॒ती प॑तिलो॒कमव॑
दी॒क्षाम॑दास्थ॒ स्वाहा॑।
प्रेतो मु॒ञ्चाति॒ नामु॒त॑स्सुब॒द्धाम॒मु॒त॑स्करत्।
यथे॒यमि॑न्द्र मीढ्वस्सुपु॒त्रा सु॒भगाऽस॑ति।
इ॒मां त्वमि॑न्द्र मीढ्वस्सुपु॒त्राग्ं सु॒भगा॑ कृणु।

दशाँस्यां पुत्रानाधेहि पतिमेकादशं कृधि।
अग्निरैतु प्रथमो देवतानागं सोँऽस्यै
  प्रजां मुंञ्चतु मृत्युपाशात्।
तदयगं राजा वरुणोऽनुमन्यतां यथेयग्ग्
  स्त्री पौत्रमघं न रोदाँत्।
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै
  नयतु दीर्घमायुः।
अशूँन्योपस्था जीवतामस्तु माता
  पौत्रमानन्दमभि प्रबुध्यतामियम्।
मा ते गृहे निशि घोष उत्थादन्यत्र
  त्वद्रुदत्यस्संविशन्तु।
मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके
  विराज पश्यन्ती प्रजागं सुमनस्यमानाम्।
द्यौस्ते पृष्ठगं रक्षतु वायुरूरू अश्विनौ च
  स्तनं धयन्तगं सविताऽभि रक्षतु।
आवासंसः परिधानाद्बृहस्पतिर्विश्वे
  देवा अभि रक्षन्तु पश्चात्।
अप्रजस्तां पौँत्रमृत्युं पाप्मानमुत वाऽघम्।
शीर्ष्णस्स्रजमिवोन्मुच्य द्विषद्भ्यः
  प्रति मुञ्चामि पाशँम्।
इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो

अग्ने॒ त्वमं॑ग्ने अ॒याऽस्य॒या सन्मनं॑सा हि॒तः।
अ॒या सन् ह॒व्यमूं॑हिषे॒ऽया नो॑ धेहि भेष॒जम्॥ 4॥

इ॒यम॒ष्टौ चं॥ 4॥

आ तिं॑ष्ठे॒ममश्मा॑न॒मश्मे॑व॒ त्वग्ग् स्थि॒रा भं॑व।
अ॒भि तिं॑ष्ठ पृतन्य॒तस्सहं॑स्व पृतना॒य॒तः।
इ॒यं ना॒र्युपं॑ ब्रूते॒ कुल्पाँ॑न्यावपन्ति॒का।
दी॒र्घा॒युरं॑स्तु मे॒ पति॒र्जीवा॑तु श॒रदं॑श्श॒तम्।
तुभ्य॒मग्ने॒ पर्यं॑वहन्थ्सू॒र्यां वं॑ह॒तुना॑ स॒ह।
पुन॒ः पतिं॑भ्यो जा॒यां दा अं॑ग्ने प्र॒जया॑ स॒ह।
पुन॒ः पत्नी॑म॒ग्निरं॑दा॒दायु॑षा स॒ह वर्चं॑सा।
दी॒र्घा॒युरं॑स्या॒ यः पति॒स्स एं॑तु श॒रदं॑श्श॒तम्।
विश्वा॑ उ॒त त्वया॑ व॒यं धारा॑ उद॒न्या॑ इव।
अतिं॑गाहेमहि॒ द्विषं॑ः।
आ तिं॑ष्ठे॒ममश्मा॑नम्।
अ॒र्य॒मण॒ं नु दे॒वं क॒न्या॑ अ॒ग्निमं॑यक्षत।
स इ॒मां दे॒वो अं॑ध्व॒रः प्रेतो मु॒ञ्चाति॒
नामुतं॑स्सुब॒द्धाम॒मुतं॑स्करत्।
तुभ्य॒मग्ने॒ पर्यं॑वह॒न्पुन॒ः पत्नी॑म॒ग्निरं॑दा॒द्विश्वा॑
उ॒त त्वया॑ व॒य मा तिं॑ष्ठे॒ममश्मा॑नम्।
त्वमं॑र्य॒मा भं॑वसि॒ यत्क॒नीना॒ं नाम॑

स्व॒धाव॒थ्स्वं॑र्यं॑ बि॒भर्॒षि॑।
अ॒ञ्जन्ति॑ वृ॒क्षग्ं सु॒धि॑तं॒ न गोभि॒र्यद्दम्पं॑ती॒
सम॑नसा कृ॒णोषि॑।
तुभ्य॒मग्रे॒ पर्य॑वह॒न्पुन॒ः पत्नी॑म॒ग्निर॑दा॒द्विश्वा॑
उ॒त त्वया॑ व॒यम्।
प्र त्वा॑ मुञ्चामि॒ वरु॑णस्य॒ पाशा॒द्येन॒
त्वाऽबं॑ध्नाथ्सवि॒ता सु॒केतः॑।
धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒के स्यो॒नं ते॑
स॒ह पत्या॑ करोमि।
इ॒मं विष्या॑मि॒ वरु॑णस्य॒ पाशं॒ यमबं॑ध्नीत
सवि॒ता सु॒शेवः॑।
धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒केऽरि॑ष्टां त्वा
स॒ह पत्या॑ कृणोमि।
अ॒याश्चा॒ग्नेऽस्यं॑नभिश॒स्तीश्च॑
स॒त्यमि॑त्त्वम॒या अ॑सि।
अयं॑सा॒ मनं॑सा धृ॒तोऽयसा॑ ह॒व्यमू॑हिषे॒ऽया नो॑
धेहि भेष॒जम्॥ **5**॥

द्विषं॑स्सु॒शेव॒स्त्रीणि॑ च॥ **5**॥

स॒त्येनोत्तं॑भिता॒ भूमि॒स्सूर्ये॒णोत्तं॑भिता॒ द्यौः।
ऋ॒तेना॑दि॒त्यास्तिष्ठं॑न्ति दि॒वि सोमो॒ अधि॑ श्रि॒तः।

युञ्जन्ति ब्रध्नं योगेयोगे।
सुकिग्ंशुकग् शल्मलिं विश्वरूपग्
हिरण्यवर्णग् सुवृतग् सुचक्रम्।
आरोह वध्वमृतस्य लोकग्ग् स्योनं
पत्ये वहतुं कृणुष्व।
उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः।
मूर्धानं पत्युरारोह प्रजया च विराड्भव।
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रुवां भव।
ननान्दरि सम्राज्ञी भव संराज्ञी अधि देवृषु।
स्नुषाणाग् श्वशुराणां प्रजायाश्च धनस्य च।
पतीनां च देवृणां च सजातानां विराड्भव।
नीललोहिते भवतः कृत्या सक्तिर्व्यज्यते।
एधन्तेऽस्या ज्ञातयः पतिर्बन्धेषु बध्यते।
ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाग् अनु।
पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः।
मा विदन्परिपन्थिनो य आसीदन्ति दम्पती।
सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः।
सुगं पन्थानमारुक्षमरिष्टग्ग् स्वस्तिवाहनम्।
यस्मिन्वीरो न रिष्यत्यन्येषां विन्दते वसु॥ **6**॥

धनस्य च नवं च॥ **6**॥

ता म॑न्दसा॒ना मनु॑षो दुरो॒ण आध॒त्तग्ं
र॒यिं द॒शवी॑रं वच॒स्यवे॓।
कृ॒तं ती॒र्थग्ं सु॑प्रपा॒णग्ं शु॑भस्पती स्था॒णुं
प॑थे॒ष्ठामप॑ दु॒र्म॒तिग्ं ह॑तम्।
अ॒यं नो॑ म॒ह्याः पा॒रग्ग् स्व॒स्ति
नै॑ष॒द्व॒न॒स्पति॑ः।
सीरा॑ नस्सु॒तरा॑ भव दीर्घायु॒त्वाय॒ वर्च॑से।
अ॒स्य॒ पा॒रे नि॑र्ऋ॒तस्य॑ जी॒वा ज्योति॑रशीमहि।
म॒ह्या इं॑न्द्रस्स्व॒स्तये॓।
यदृ॒ते चि॑दभि॒श्रिष॑ः पु॒रा ज॒र्तृभ्य॑ आ॒तृद॑ः।
सन्धा॑ता स॒न्धिं म॒घवा॑ पु॒रो॒वसु॒र्निष्क॑र्ता॒
विह्रु॑तं॒ पुन॑ः।
इडा॑मग्न इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒
स त्वं नो॑ अग्ने॒ त्वम॑ग्ने अ॒याऽसि॑।
ये ग॑न्ध॒र्वा अ॑प्स॒रस॑श्च दे॒वीरे॒षु
वृ॒क्षेषु॑ वानस्प॒त्येष्वास॑ते।
शि॒वास्ते अ॒स्यै व॒ध्वै॑ भवन्तु॒ मा
हिग्ं॑सिषुर्वह॒तुमू॒ह्यमा॑नाम्।
या ओष॑धयो॒ या न॒द्यो॑ यानि॒
धन्वा॑नि॒ ये वना॓।
ते त्वा॑ वधु प्र॒जाव॑तीं॒ प्र त्वे

मु॒ञ्च॒न्त्वग्ं॒ह॑सः।
संका॑शयामि वह॒तुं ब्रह्म॑णा गृ॒हैरघो॑रेण॒
चक्षु॑षा॒ मैत्रे॑ण।
प॒र्याण॑द्धं वि॒श्वरू॑पं॒ यद॒स्याग्॒ स्यो॒नं
पति॑भ्यस्सवि॒ता कृ॑णोतु॒ तत्।
आ वा॑मगन्थ्सुम॒तिर्वा॑जिनीवसू॒ न्य॑श्विना
हृ॒थ्सु कामाग्॑ं अयग्ं॒सत।
अभू॑तं गो॒पा मि॑थु॒ना शु॑भस्पती प्रि॒या
अ॑र्य॒म्णो दु॒र्याग्॑ं अशीमहि।
अ॒यं नो॑ दे॒वस्स॑वि॒ता बृह॒स्पति॑रिन्द्रा॒ग्नी
मि॒त्रावरु॑णा स्व॒स्तये॑।
त्वष्टा॒ विष्णु॑ः प्र॒जया॑ सग्ं॒र॒रा॒णः काम॒
आया॑तं॒ कामा॑य त्वा॒ विमु॑ञ्चतु॥ 7॥

आस॑ते॒ नव॑ च॥ 7॥

शर्म॒ वर्मे॑दमाह॑रा॒स्यै नार्या॑ उप॒स्तिरे॑।
सिनी॑वालि॒ प्रजा॑यतामि॒यं भग॑स्य सुम॒ता अ॑सत्।
गृहान्भ॒द्रान्थ्सु॒मन॑स॒ः प्रप॒द्येऽवी॑रघ्नी
वी॒रव॑तस्सु॒वीरान्॑।
इरां॒ वह॑तो घृतमु॒क्षमा॑णा॒स्तेष्व॒हग्ं॒
सु॒मना॒स्सं वि॑शामि।

आग॑न्गो॒ष्ठं महि॑षी॒ गोभि॒रश्वै॒रायु॑ष्मत्पत्नी
  प्र॒जया॑ँ स्व॒र्वित्।
ब॒ह्वीं प्र॒जां ज॒नय॑न्ती सुर॒त्नेमम॒ग्निग्ं
  श॒तहि॑मास्सपर्यात्।
अ॒यम॒ग्निर्गृ॒हप॑तिस्सुस॒ग्ं॒सत्पु॑ष्टि॒वर्ध॑नः।
यथा॒ भग॑स्या॒भ्यां दद॑द्र॒यिं
  पुष्टि॒मथो॑ँ प्र॒जाम्।
प्र॒जाया॑ आभ्यां प्रजापत॒ इन्द्रा॑ँग्नी॒
  शर्म॑ यच्छतम्।
यथैन॑यो॒र्न प्र॑मी॒याता॑ उ॒भयो॒र्जीव॑तोः प्र॒जाः।
तेन॑ भू॒तेन॑ ह॒विषा॒ऽयमाप्या॑यतां॒ पुन॑ः।
जा॒यां याम॑स्मा॒ आवा॑ँक्षु॒स्ताग्
  रसे॑ना॒भिव॑र्धताम्।
अ॒भिव॑र्धतां॒ पय॑सा॒ऽभि रा॒ष्ट्रेण॑ वर्धताम्।
र॒य्या स॒हस्र॑पोषसे॒मौ स्ता॒मन॑पेक्षितौ।
इ॒हैव स्तं॒ मा वियो॑ँष्टं॒ विश्व॒मायु॒र्व्य॑श्नुतम्।
म॒ह्या इ॑न्द्रस्स्व॒स्तये॑ँ।
ध्रु॒वैधि पो॑ँष्या॒ मयि॒ मह्यं॑ त्वाऽदा॒द्बृह॒स्पति॑ः।
मया॒ पत्या॑ँ प्र॒जाव॑ती॒ सं जी॑व श॒रद॑श्श॒तम्।
त्वष्टा॑ जा॒याम॑जनय॒त्त्वष्टा॑ँऽस्यै॒ त्वां पति॑ँम्।
त्वष्टा॑ स॒हस्र॒मायू॒ग्ं॒षि दी॒र्घमायु॑ः कृणोतु वाम्।

इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒
स त्वं नो॑ अग्ने॒ त्वमं॑ग्ने अ॒याऽसिं॥ **8**॥

जीवं॑तोः प्र॒जा वा॒मेकं॒ च॥ **8**॥

इ॒ह गाव॒ः प्रजा॑यध्वमि॒हाश्वा॑ इ॒ह पूरु॑षाः।
इ॒हो स॒हस्रं॑दक्षिणो रा॒यस्पोषो॒ निषी॑दतु।
सोमे॑नादि॒त्या ब॒लिन॒स्सोमे॑न पृथि॒वी दृ॒ढा।
अथो॒ नक्षं॑त्राणामे॒षामु॒पस्थे॒ सोम॒ आधि॑तः।
प्रस्वस्स्थ॒ः प्रेयं प्र॒जया॒ भुव॑ने शोचेष्ट।
इ॒ह प्रि॒यं प्र॒जया॑ ते॒ समृ॑ध्यताम॒स्मिन्गृ॒हे
गार्॒हं॑पत्याय जागृहि।
ए॒ना पत्या॑ त॒न्वगं॒ सगं॒ सृं॑ज॒स्वाथा॒
जीव्री॑ वि॒दथ॒मावं॑दासि।
सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒मागं॒ सं॑मेत॒ पश्यं॑त।
सौभाँ॑ग्यम॒स्यै द॒त्वायाथास्तं॒ विपरे॑तन।
ध्रु॒वक्षि॑तिर्ध्रु॒वयो॑निर्ध्रु॒वमं॑सि ध्रु॒वतं॑स्स्थि॒तम्।
त्वं नक्षं॑त्राणां मे॒थ्यसि॒ स मा॑ पाहि पृतन्य॒तः।
स॒प्त॒र्॒षयं॑ः प्रथ॒मां कृत्तिं॑कानामरुन्ध॒तीं
यद्ध्रु॒वता॒गं॒ ह नि॒न्युः।
षट्कृत्तिं॑का मुख्ययो॒गं
वहं॑न्ती॒यम॒स्माकं॑मेधत्वष्ट॒मी।

सदंस॒स्पति॒मद्भुंतं प्रि॒यमिन्द्रंस्य॒ काम्यँम्।
सनिं मे॒धामंयासिषम्।
उद्दींप्यस्व जातवेदोऽप॒घ्नन्निर्॒ऋतिं॒ ममं।
प॒शूग्॒श्च॒ मह्य॒मावंह॒ जीवंनं च॒ दिशों दश।
मानों हिग्ंसीज्ञातवेदो॒ गामश्वं॒ पुरुंषं॒ जगंत्।
अबिंभ्र॒दग्न॒ आगंहि श्रि॒या मा॒ परिं पातय॥ **9**॥

ध्रु॒वतंस्स्थि॒तं नवं च॥ **9**॥

उ॒दी॒र्ष्वातों विश्वावसो॒ नमंसेडामहे त्वा।
अ॒न्यामिंच्छ प्रफ॒र्व्यंग्॒ सं जा॒यां
पत्यां सृज।
उ॒दी॒र्ष्वा॒तः॒ पतिंवति॒ ह्येंषा वि॒श्वावंसु॒
नमंसा गी॒र्भिरींट्टे।
अ॒न्यामिंच्छ पितृ॒षदं॒ व्यंक्ता॒ग्॒ स तें भा॒गो
ज॒नुषा॒ तस्यं विद्धि।
अग्नें प्रायश्चित्ते॒ त्वं दे॒वाना॒ं प्रायंश्चित्तिरसि
ब्राह्म॒णस्त्वां ना॒थकांम॒ः प्रपंद्ये॒ याऽस्यां
पंति॒घ्नी त॒नूः प्रंजा॒घ्नी पंशु॒घ्नी लंक्ष्मि॒घ्नी
जां॒र॒घ्नीमंस्यै॒तां कृंणोमि॒ स्वाहां।
वायों प्रायश्चित्त॒ आदिंत्य प्रायश्चित्ते॒ प्रजांपते
प्रायश्चित्ते॒ त्वं दे॒वाना॒ं प्रायंश्चित्तिरसि

ब्राह्म॒णस्त्वा॑ ना॒थका॑म॒: प्रप॑द्ये॒ याऽस्यां
प॑ति॒घ्नी त॒नूः प्र॑जा॒घ्नी प॑शु॒घ्नी ल॑क्ष्मि॒घ्नी
जा॑र॒घ्नीम॑स्यै॒ तां कृ॑णोमि॒ स्वाहा॑।
प्र॒स॒वश्चो॑पया॒मश्च॒ काट॑श्चार्ण॒वश्च॑ धर्ण॒सिश्च॒
द्रवि॑णं च॒ भग॑श्चा॒न्तरि॑क्षं च॒ सिन्धु॑श्च
समु॒द्रश्च॒ सर॑स्वाग्श्च वि॒श्वव्य॑चाश्च॒ ते यं द्वि॒ष्मो
यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्म॒स्स्वाहा॑।
मधु॑श्च॒ माध॑वश्च शु॒क्रश्च॒ शुचि॑श्च॒ नभ॑श्च
नभ॒स्य॑श्चे॒षश्चो॒र्जश्च॒ सह॑श्च सह॒स्य॑श्च॒ तप॑श्च
तप॒स्य॑श्च॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒
जम्भे॑ दध्म॒स्स्वाहा॑।
चि॒त्तं च॒ चित्ति॒श्चाकू॑तं॒ चाकू॑ति॒श्चाधी॑तं॒
चाधी॑तिश्च॒ विज्ञा॑तं च वि॒ज्ञानं॑ च॒ नाम॑ च॒
क्रतु॑श्च॒ दर्॒श॑श्च पू॒र्णमा॑सश्च॒ ते यं द्वि॒ष्मो यश्च॑
नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्म॒स्स्वाहा॑।
भूस्स्वाहा॒ भुव॒स्स्वाहा॒
सुव॒स्स्वाहोग्॒स्वाहा॑॥ **10**॥

उ॒दी॒र्ष्वातो॒ दश॑॥ **10**॥

अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑तान॒ तप॑सो
जा॒तं तप॑सो॒ विभू॑तम्।

इ॒ह प्र॒जामि॒ह र॒यिगं॒ ररा॑ण॒ः प्रजा॑यस्व
  प्र॒जया॑ पुत्रकाम।
अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑ना॒ग्ं॒ स्वाया॑ं
  त॒नूगं॒ ऋ॒त्विये॒ नाथ॑मानाम्।
उप॒ मामु॒च्चा यु॑व॒तिर्बभू॑या॒ः प्रजा॑यस्व
  प्र॒जया॑ पुत्रकामे।
सम॑ञ्जन्तु॒ विश्वे॑ दे॒वास्समापो॒ हृद॑यानि नौ।
सं मा॑त॒रिश्वा॒ सं धा॒ता समु॒ देष्ट्री॑
  दिदेष्टु [दिदेष्टि] नौ।
प्रजा॑पते त॒न्व॑ मे जुषस्व॒
  त्वष्ट॑र्दे॒वेभि॑स्स॒हसा॒म इ॑न्द्र।
विश्वै॑र्दे॒वै रा॒तिभि॑स्सगं॒ररा॒णः पु॒गं॒सां
  ब॑हू॒नां मा॒तर॑स्स्याम।
आ न॑ः प्र॒जां ज॑नयतु प्र॒जाप॑तिराजर॒साय॒
  सम॑नक्त्वर्य॒मा।
अदु॑र्मङ्गलीः पतिलो॒कमावि॑श॒ शं नो॑ भव
  द्वि॒पदे॒ शं चतु॑ष्पदे।
तां पू॑षञ्छि॒वत॑मा॒मेर॑यस्व॒ यस्या॒ं
  बीज॑ं मनु॒ष्या॑ वप॑न्ति।
या न॑ ऊ॒रू उ॑श॒ती वि॒स्रया॑ते॒
  यस्या॑मु॒शन्त॒ः प्रह॑रेम॒ शेफ॑म्॥ **11**॥

[या न॑ ऊ॒रू उ॑श॒ती वि॒स्रया॑तै॒
यस्या॑मु॒शन्तः॑ प्र॒हरे॑म॒ शेफँ॑म्॥ 11 ॥]

शं चतु॑ष्पदे॒ द्वे च॑॥ 11 ॥

आरो॑हो॒रुमुप॑बर्हस्व बा॒हुं परि॑ष्वजस्व
जा॒याग्ं सु॑मन॒स्यमा॑नः।
तस्याँ॑ पुष्यतं मिथु॒नौ सयो॑नी ब॒ह्वीं प्र॒जां
ज॒नय॑न्तौ॒ सरे॑तसा।
आ॒र्द्रयाऽर॑ण्या॒ यत्राम॑न्थ॒त्पुरु॑षं॒
पुरु॑षेण श॒क्रः।
तदे॒तौ मि॑थु॒नौ सयो॑नी
प्र॒जया॒ऽमृते॑ने॒ह ग॑च्छतम्।
अ॒हं गर्भ॒मद॑धा॒मोष॑धीष्व॒हं
विश्वे॑षु॒ भुव॑नेष्व॒न्तः।
अ॒हं प्र॒जा अ॑जनयं पितॄ॒णाम॒हं
जनि॑भ्यो अव॒रीषु॑ पु॒त्रान्।
पु॒त्रिणे॒मा कु॑मा॒रिणा॒ विश्व॒मायु॒र्व्य॑श्नुतम्।
उ॒भा हिर॑ण्यपेशसा वी॒तिहो॑त्रा कृ॒तद्व॑सू।
द॒श॒स्यन्त्वा॒ऽमृता॑य॒ कग्ं शमूधो॑ रोम॒शग्ं
ह॑थो दे॒वेषु॑ कृणुतो॒ दुवः॑॥ 12 ॥

आरो॑ह॒ नव॑॥ 12 ॥

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते।
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा।
हिरण्ययी अरणी यं निर्मन्थतो अश्विना।
तं ते गर्भं हवामहे दशमे मासि सूतवे।
यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे।
एवं त्वं गर्भमाधत्स्व दशमे मासि सूतवे।
यथा पृथिव्यग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी।
वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते।
विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम्।
पुमांसं गर्भमाधेहि दशमे मासि सूतवे।
नेजमेष परापत सपुत्रः पुनरापत।
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान्।
व्यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो
धीयतां गर्भो अन्तः।
तं माता दशमासो बिभर्तु स जायतां
वीरतमस्स्वानाम्।
आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम्।
आ वीरो जायतां पुत्रस्ते दशमास्यः॥ **13**॥

गर्भं दधामि तेऽष्टौ चं॥ **13** ॥

करोमिं ते प्राजापत्यमा गर्भो योनिंमेतु ते।
अनूंनः पूर्णो जांयतामश्लोणोऽपिंशाचधीतः।
पुमाग्ंस्ते पुत्रो नांरि तं पुमाननुंजायताम्।
तानिं भद्राणि बीजाँन्यृषभा जंनयन्तु नौ।
यानिं भद्राणि बीजाँन्यृषभा जंनयन्ति नंः।
तैस्त्वं पुत्रान् विंन्दस्व सा प्रसूर्धेनुका भंव।
कामप्रमृंध्यतां मह्यमपंराजितमेव मेँ।
यं कामं कामयें देव तं मे वायो समंर्धय।
अनुहवं पंरिहवं पंरीवादं पंरिक्षपम्।
दुस्स्वंप्नं दुरुंदितं तद्द्विषद्भ्यों दिशाम्यहम्।
अनुंहूतं परिंहूतगं शकुनेर्यदशांकुनम्।
मृगस्यं सृतमंक्ष्णया तद्द्विषद्भ्यों दिशाम्यहम्।
आरात्तें अग्निरंस्त्वारात्पंरशुरंस्तु ते।
निवाते त्वाऽभि वंर्षतु स्वस्ति तेँऽस्तु वनस्पते
स्वस्ति मेँऽस्तु वनस्पते।
नमंश्शकृथ्सदें रुद्राय नमों रुद्रायं शकृथ्सदेँ।
गोष्ठमंसि नमंस्ते अस्तु मा मां हिग्ंसीस्सिगंसि
नसि वज्रो नमंस्ते अस्तु मा मां हिग्ंसीः।
उद्गातेवं शकुने सामं गायसि ब्रह्मपुत्र इंव

सर्वनेषु शग्ंससि।
स्वस्ति नंश्शकुने अस्तु प्रति नस्सुमना भव॥ **14**॥

अहमष्टौ च॥ **14**॥

प्रातरग्निं प्रातरिन्द्रग्ं हवामहे
प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत
रुद्रग्ं हुवेम।
प्रातर्जितं भगमुग्रग्ं हुवेम वयं
पुत्रमदितेर्यो विधर्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा
चिद्यं भगं भक्षीत्याह।
भग प्रणेतर्भग सत्यराधो भगेमां
धियमुदव ददन्नः।
भग प्रणो जनय गोभिरश्वैर्भग
प्रनृभिर्नृवन्तस्स्याम।
उतेदानीं भगवन्तस्स्यामोत प्रपित्व
उत मध्ये अह्नाम्।
उतोदिता मघवन्थ्सूर्यस्य वयं देवानाग्ं
सुमतौ स्याम।
भग एव भगवाग्ं अस्तु देवास्तेन

वयं भगवन्तस्स्याम।
तं त्वा भग सर्व इज्ञोहवीमि स नो
भग पुर एता भवेह।
समध्वरायोषसो नमन्त दधिक्रावेव
शुचये पदाय।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा
वाजिन आवहन्तु।
अश्वावतीर्गोमतीर्न उषासो
वीरवतीस्सदमुच्छन्तु भद्राः।
घृतं दुहाना विश्वतः प्रपीना यूयं पात
स्वस्तिभिस्सदा नः॥ **15**॥

भवेह चत्वारि च॥ **15**॥

इमां खनाम्योषधीं वीरुधं बलवत्तमाम्।
यया सपत्नीं बाधते यया संविन्दते पतिम्।
उत्तानपर्णे सुभगे सहमाने सहस्वति।
सपत्नीं मे पराधम पतिं मे केवलं कृधि।
उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः।
अथा सपत्नी या ममाधरा साऽधराभ्यः।
न ह्यस्यै नाम गृभ्णामि नो
अस्मिन्रमते जने।

परा॑मे॒व प॑रा॒वत॑ग्ं स॒पत्नीं॑ नाशयामसि।
अ॒हम॑स्मि॒ सह॑मा॒नाऽथ॒ त्वम॑सि सास॒हिः।
उ॒भे सह॑स्वती भू॒त्वा स॒पत्नीं॑ मे सहावहै।
उप॑ तेऽधा॒ग्ं॒ सह॑माना॒मभि
त्वा॑ऽधा॒ग्ं॒ सही॑यसा।
मामनु॒ प्र ते॒ मनो॑ व॒त्सं गौरि॑व धावतु
प॒था वारि॑व धावतु॥ **16**॥

स॒हा॒व॒हे॒ द्वे च॑॥ **16**॥

उ॒द॒सौ सूर्यो॑ अगा॒दु॒दयं मा॑म॒को भग॑ः।
अ॒हं तद्वि॑द्व॒ला प॑तिम॒भ्य॑साक्षि विषास॒हिः।
अ॒हं के॒तुर॒हं मू॒र्धाऽहमु॒ग्रा वि॒वाच॑नी।
ममेदनु॒ क्रतुं॒ पति॑स्सेहा॒नाया॑ उ॒वाच॑रेत्।
मम॑ पु॒त्राश्श॑त्रु॒हणोऽथो॑ मे दुहि॒ता वि॒राट्।
उ॒ताहम॑स्मि॒ सञ्ज॑या॒ पत्यु॑र्मे॒ श्लोक॑ उत्त॒मः।
येनेन्द्रो॑ ह॒विषा॑ कृ॒त्य॑भवद्द्यु॒म्न्यु॑त्त॒मः।
अ॒हं तद॑क्रि देवा अस॒पत्ना किला॑भवम्।
अ॒स॒प॒त्ना स॑पत्नि॒घ्नी जय॑न्त्यभि॒भूव॑रीः।
आवि॑थ्सि॒ सर्वा॑सा॒ग्ं॒ राधो॒ वर्चो॒
अस्थे॑यसामिव।

सम॑जैषमि॒मा अ॒हग्ं स॒पत्नी॑रभि॒भूव॑रीः।
यथा॒ऽहम॑स्य वी॒रस्य॑ वि॒राजा॑मि॒ धन॑स्य च॥ **17**॥

अस्थे॑यसामिव॒ द्वे च॑॥ **17**॥

अ॒क्षीभ्यां॑ ते॒ नासि॑काभ्यां॒ कर्णा॑भ्यां॒
चुबु॑का॒दधि॑।
यक्ष्मग्ं॑ शीर्॒ष॒ण्य॑ म॒स्तिष्का॑ज्जि॒ह्वाया॒
विवृ॑हामि ते।
ग्री॒वाभ्य॑स्त उ॒ष्णिहा॑भ्यः॒ कीक॑साभ्योऽनू॒क्या॑त्।
यक्ष्म॑ दोष॒ण्य॑मग्ंसा॑भ्यां बा॒हुभ्यां॒
विवृ॑हामि ते।
आ॒न्त्रेभ्य॑स्ते॒ गुदा॑भ्यो वनि॒ष्ठोर्हृद॑या॒दधि॑।
यक्ष्मं॒ मत॑स्नाभ्यां य॒क्नः प्ला॒शिभ्यो॒ विवृ॑हामि ते।
ऊ॒रुभ्यां॑ तेऽष्ठी॒वद्भ्यां॒ जङ्घा॑भ्यां॒ प्रप॑दाभ्याम्।
यक्ष्म॒ग्ग् श्रोणी॑भ्यां भा॒सदा॑द्ध्व॒ग्ं॒सस॒
विवृ॑हामि ते।
मेह॑नाद्वल॒ङ्कर॑णा॒ल्लोम॑भ्यस्ते न॒खेभ्य॑ः।
यक्ष्म॒ग्ं॒ सर्व॑स्मादा॒त्मन॒स्तमि॒मं विवृ॑हामि ते।
अङ्गा॑दङ्गा॒ल्लोम्नो॑लोम्नो जा॒तं पर्व॑णिपर्वणि।
यक्ष्म॒ग्ं॒ सर्व॑स्मादा॒त्मन॒स्तमि॒मं विवृ॑हामि ते।
परा॑देहि शाब॒ल्य॑ ब्र॒ह्मभ्यो॒ विभ॑जा॒ वसु॑।

कृत्यैषा पद्वती भूत्वा जायाऽऽविंशते पतिम्।
अश्लीला तनूर्भवति रुशंती पापयाऽमुया।
पतिर्यद्वध्वै वासंसा स्वमङ्गंमभि धित्संति।
क्रूरमेतत्कटुंकमेतदंपाष्ठवंद्विषवन्नैतदत्तंवे।
सूर्यां यः प्रत्यक्षं विद्यात्स एतत्प्रतिंगृह्णीयात्।
आशसंनं विशसंनमथों अधि विचर्तनम्।
सूर्यायाः पश्य रूपाणि तानिं
ब्रह्मोत शगंसति॥ **18**॥

इमं विवृंहामि ते शगंसति॥ **18**॥

अक्षीभ्यां ग्रीवाभ्यं आन्त्रेभ्यं ऊरुभ्यां
मेहंनादङ्गांदङ्गात्परांदेहि सप्त॥

प्रसुग्मन्ताऽष्टादंश हिरंण्यवर्णाः पञ्चंदश सोमंः
प्रथमष्षोडंश सोमांय जनिविदेऽष्टादशातिंष्ठेमं
त्रयोंविगं शतिस्सत्येन ता मंन्दसानैकान्न विगंशतिरेकान्न
विगंशतिश्शर्म वर्मैकंविगंशतिरिह गाव एकान्न
विगंशतिरुदीर्ष्वातो दशापंश्यं त्वा द्वादशारोंहोरुं नव
विष्णुर्योनिं करोमिं तेऽष्टादंशाष्टादश प्रातरग्निं
चतुंर्दशेमां खनाम्युदसौ सूर्यो द्वादंशद्वादशाक्षीभ्यां
ते विगंशतिरष्टादंश॥ **18**॥

अक्षीभ्यां ते नासिंकाभ्याम्।
उदसौ सूर्यो अगात्।
इमां खनाम्योषंधीम्।
प्रातरग्निम्।

करोमि ते प्राजापत्यम्।
विष्णुर्योनिं कल्पयतु।
आरोहोरुम्।
अपश्यं त्वा मनसा चेकितानम्।
उदीर्ष्वातो विश्वावसो।
इह गावः प्रजायध्वम्।
शर्म वर्मेदमाहर।
ता मन्दसाना मनुषो दुरोणे।
सत्येनोत्तभिता भूमिः।
आतिष्ठेममश्मानम्।
सोमाय जनिविदे स्वाहा।
सोमः प्रथमो विविदे गन्धर्वः।
हिरण्यवर्णाश्शुचयः पावकाः।
प्रसुग्मन्ता धियसानस्य सक्षणि॥ **18**॥

प्रसुग्मन्ताऽपश्यं त्वाऽष्टादश॥ **18**॥

प्रसुग्मन्ता तानि ब्रह्मोत शंसति॥

॥ हरिः ओ(३)म्॥

**॥ इति एकाग्निकाण्डे प्रथमः प्रश्नः समाप्तः॥**